कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M११ विषय स्तोत्र

नाव. श्रीरामरक्षा (Mss)

लेखक/लिपीकार —

पृष्ठ ३ काळ — पूर्ण/अपूर्ण

॥ रामरक्षा ॥

॥ श्रीगणेशायनमः ॥

श्रीगणेशाय नमः ॥ अस्य श्रीरामरक्षास्तो
त्रमंत्रस्य बुधकौशिक ऋषिः ॥ अनुष्टुप्
छंदः ॥ श्रीसीतारहित श्रीरामचंद्रो देवता
॥ श्रीं बीजं ॥ रामशक्तिः ॥ मं कीलकं ॥ सर्व
बाधा निरसनार्थं श्रीसीतारामचंद्रप्रीर्त्यर्थे
रामरक्षास्तोत्रमंत्रजपे विनियोगः ॥
अथ मूलमंत्रः ॥ ॐ रां रीं रूं रैं रौं रः ॥
ॐ नमः रामाय ॐ रः रौं रैं रूं रीं रां ॐ ॥

॥१॥

अथ ध्यानं ॥ अयोध्यानगरे रम्ये रत्न
मंडपमध्यतः ॥ ध्यायेत्कल्पतरोर्मू
ले रत्नसिंहासने स्थितं ॥१॥ स्मरे
द्वारारथिं रामं ध्यायेत्तं परमं पदं ॥
प्रकृत्या सीतया युक्तं रामं राजीव
लोचनं ॥२॥ देवासुरमुनींद्रैश्च यो
गींद्रैश्च सेवितं ॥ कारणं सर्वजी

वानांचिन्मयंब्रह्मव्यापकं॥३॥वामां
गेजानकीयस्यदक्षिणेचैवलक्ष्मणः॥
पूर्वतोमारुतिर्यस्यतंवंदेरघुनंदनं॥
४॥इतिध्यानं॥ॐचरितंरघुनाथ
स्यशतकोटिप्रविस्तरं॥एकैकमक्ष
रंपूंसांमहापातकनाशनं॥५॥ध्या
त्वानीलोत्पलश्यामंरामंराजीवलो

चनं॥जानकीलक्ष्मणोपेतंजटामुकु
टमंडितं॥६॥सासितूणधनुर्बाणपा
णिंनक्तंचरांतकं॥स्वलीलयाजगत्त्रा
तुमाविर्भूतमजंविभुं॥७॥रामरक्षां
पठेत्प्राज्ञःपापघ्नींसर्वकामदां॥शिरो
मेराघवःपातुभालंदशरथात्मजः॥८
कौसल्येयोदृशौपातुविश्वामित्रप्रियः
श्रुती॥घ्राणंपातुमखत्रातामुखंसौमि

त्रिवत्सलः॥९॥ जिव्हांविद्यानिधिः पातुकं
ठंभरतवंदितः॥ स्कंधोदिव्यायुधः पातु
भुजोभग्नेशकार्मुकः॥१०॥ करौसीता
पतिः पातुहृदयंजामदग्न्यजित्॥ पार्श्वे
रघुपतिः पातुकुक्षिमिक्ष्वाकुनंदनः॥११
मध्यंपातुखरध्वंसीनाभिंजाम्बवदाश्र
यः॥ सुग्रीवेशः कटिंपातुसक्थिनीह
नुमत्प्रभुः॥१२॥ ऊरूरघूत्तमः पातुरक्षः

कुलविनाशकृत्॥ जानुनीसेतुकृत्पा
तुजंघेदशमुखांतकः॥१३॥ गुल्फौगु
णनिधिः पातुकाकुत्स्थः पातुचांगुलीः॥
पादौविभीषणश्रीदः पातुरामोऽखि
लंवपुः॥१४॥ एतांरामबलोपेतांरक्षां
यः सुकृतीपठेत्॥ सचिरायुः सुखी
पुत्रीविजयीविनयीभवेत्॥१५॥ पाता

कास्तलव्योमचारिणः छद्मचारिणः॥
न द्रष्टुमपि शक्तास्ते र°क्षितं रामना
मभिः॥१६॥ रामेति रामभद्रेति राम
चंद्रेति वा स्मरन्॥ नरो न लिप्यते पापै
र्भुक्तिं मुक्तिं च विंदति॥१७॥ जगज्जै
त्रैकमंत्रेण रामनाम्नाभिरक्षितं॥ यः कं
ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः॥
१८॥ वज्रपंजरनामेदं यो रामकवचं

पठेत्॥ अव्याहताज्ञः सर्वत्र लभते जय
मंगलं॥१८॥ आदिष्टवान्यथा स्वप्ने
रामरक्षामिमां हरः॥ तथा लिखित
वान्प्रातः प्रबुद्धो बुधकौशिकः॥१९॥
रामो दाशरथी शूरो लक्ष्मणानुचरो
बली॥ काकुत्स्थः पुरुषः पूर्णः कौसा
ल्यो रघुत्तमः॥२०॥ वेदांतवेद्यो यज्ञे
शः पुराणपुरुषोत्तमः॥ जानकीवल्ल

भः श्रीमानप्रमेयपराक्रमः ॥२१॥ इत्स
तां निजपेन्निसं मद्भक्तः श्रद्धयान्वितः ॥
अश्वमेधायुतं पुण्यं संप्राप्नोति न संश
यः ॥२२॥ तरुणौ रूपसंपन्नौ सुकुमा
रौ महाबलौ ॥ पुंडरीकविशालाक्षौ
चीरकृष्णाजिनांबरौ ॥२३॥ फलमूला
शनौ दांतौ तापसौ ब्रह्मचारिणौ ॥
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्म

णौ ॥२४॥ शरण्यौ सर्वसत्वानां श्रेष्ठौ स
र्वधनुष्मतां ॥ रक्षःकुलनिहंतारौ त्राये
तां नो रघुत्तमौ ॥२५॥ आत्तसज्जधनुषा
विषुस्पृशावक्षयाशुगनिषंगसंगौ ॥
रक्षणाय मम रामलक्ष्मणावग्रतः
पथि सदैव गच्छतां ॥२६॥ सन्नद्धः कवची
खड्गी चापबाणधरो युवा ॥ गच्छन्म
नोरथस्माकं रामः पातु सलक्ष्मणः ॥२७
रामः दाशरथिः शूरो लक्ष्मणानुचरो बली ॥ ...

॥६॥

लापदं॥अभिराममस्त्रिलोकानां रामः
श्रीमान्नूजनप्रभुः॥२८॥दक्षिणेल
क्ष्मणोयस्य वामेतुजनकात्मजा॥पु
रतोमारुतिर्यस्य तंवंदेरघुनंदनं॥
२९॥श्रीरामनामाक्षरमंत्रबीजंसं
जीवनीयंमनसाप्रविष्टं॥हलाहलं
वाप्रलयानलंवामृत्युमुखंवाविशं
तोभयन॥३०॥रामंलक्ष्मणपूर्वजंर

६

घुवरंसितापतिंसुंदरं॥काकुत्स्थंक
रुणार्णवंगुणनिधिंविप्रप्रियंधार्मि
कं॥राजेंद्रंसत्यसिंधुंदशरथतनयं
श्यामलंशांतिमूर्तिं वंदेलोकाभि
रामंरघुकुलतिलकंराघवंरावणा
रिं॥३१॥लोकाभिरामंरणरंगधी
रं राजीवनेत्रंरघुवंशनाथं॥कारु
ण्यरूपंकरुणाकरंतंश्रीरामचंद्रं

॥७॥

शरणंप्रपद्ये॥३२॥माताराममत्पिता रामचंद्रः स्वामीरामोमत्सखारामचंद्रः॥ सर्वस्वंमेरामचंद्रोदयालो नान्यंजानेनैवजानेनजाने॥३३॥श्रीराम राम रघुनंदनराम राम श्रीरामराम रणकर्कशराम राम श्रीराम राम शरणं भव राम राम॥३४॥ श्रीराम रामरत्नं भव राम राम॥ रामरामतव पादपंकजं चिंतयामि भवबंधमुक्तये॥

वंदितं सुरनरेंद्रमौलिभिः ध्यायते मनसा योगिभिः सदा॥३५॥ श्रीरामचंद्र पूर्व जय शब्दमध्ये जयद्वये नापिपुनः प्रयुक्ते॥ त्रिःसप्तकृत्वा रघुनाथनाम जपन्निहन्या द्विजकोटिहत्यां॥३६॥राम रामेति रामेति रमे रामे मनोरमे॥ सहस्रनाम तत्तुल्यं श्रीरामनाम वरानने॥३७॥कूजंतं राम रामेति मधुरं मधुराक्षरं॥ आरुह्य कविता शा

॥८

रवां वंदे वाल्मिककोकिलं ॥३८॥ जले
रक्षतु वाराहस्थले० ॥३९॥ भर्जनं भवबी
जानां वर्द्धनं सुखसंपदां ॥ तर्जनं यम
दूतानां नूहरे नामगर्जन ॥४०॥ सकृदु
च्चारितं येन हरिरित्यक्षरद्वयं ॥ बद्धःपरि
कररतेन मोक्षायगमनंप्रति ॥४०॥ तिथि
विष्णु स्तथावार नक्षत्र विष्णुरेवच ॥ योगं
चकरणं विष्णुः सर्वविष्णुमयंजगत् ॥(४१)
इतिश्रीमद्वाल्मिकिविरचितंश्रीरामरक्षास्तोत्रंसं
पूर्णं ॥ ८